यो जेमति स स्वपिति सुप्तो अन्यानपि विषयाननुभवति ।
विषयाननुभवमानः स वीतरागः कथं ज्ञानी ॥

**तम्हा कवलाहारो केवलिणो णत्थि दोहिं वि णएहिं ।**
**मण्णंति य आहारं जे ते मिच्छायअण्णाणी ॥ ११५ ॥**

तस्मात्कवलाहारः केवलिनो नास्ति द्वाभ्यामपि नयाभ्यां ।
मन्यन्ते चाहारं ये ते मिथ्याज्ञानिनः ॥

---

१ से क । २ ना ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अण्णं जं इय उत्तं संसयमिच्छत्तकलियभावेण ।**
**अम्हंचि थविरकप्पो कंवलगहणेण ण हु दोसो ॥ ११६ ॥**

अन्यद्यदित्युक्तं संशयमिथ्यात्वकलितभावेन ।
अस्माकं स्थविरकल्पः कम्बलग्रहणेन न हि दोषः ॥

**कंवलि वत्थं दुद्धिय दंडं कणयं च रयणभंडाइं ।**
**सग्गग्गमणणिमित्तं मोक्खस्स य होइ णिब्भंतं ॥ ११७ ॥**

कम्बलं वस्त्रं दुग्धिकं दण्डं कनकं च रत्नभाण्डादीनि ।
स्वर्गगमननिमित्तं मोक्षस्य च भवति निर्भ्रान्तं ।

**ण उ[1] होइ थविरकप्पो गिहत्थकप्पो हवेइ फुडु एसो ।**
**इय सो[2] धुत्तेहिं कओ थविरकप्पस्स भग्गेहिं ॥ ११८ ॥**

न ऊ भवति स्थविरकल्पो गृहस्थकल्पो भवति स्फुटमेषः ।
इति धूर्तैः कृतः स्थविरकल्पस्य भग्नैः ॥

**दुविहो जिणेहिं कहिओ जिणकप्पो तह य थविरकप्पो य ।**
**सो जिणकप्पो उत्तो[3] उत्तमसंहणणधारिस्स ॥ ११९ ॥**

द्विविधो जिनैः कथितो जिनकल्पस्तथा च स्थविरकल्पश्च ।
स जिनकल्प उक्त उत्तमसंहननधारिणः ॥

**जत्थ ण कंटयभग्गो पाए णयणम्मि रयपविट्ठम्मि ।**
**फेडंति सयं मुणिणो परावहारे य तुण्हिक्का ॥ १२० ॥**

यत्र न कंटकलग्नं पादे नयनयो रजःप्रविष्टे ।
स्फेटयन्ति स्वयं मुनयः परापहारे च तूष्णीकाः ॥

---

१ ऊ गर्हाविस्मयसूचनाक्षेपे इत्यनेन आक्षेपे गम्यते । २ सोक्खयरेहि ख
३ कहिओ ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जलवरिसणवा याई गमणे भग्गे य जम्म छम्मासं।**
**अच्छंति णिराहारा काओसग्गेण छम्मासं ॥ १२१ ॥**

जलवर्षायां जातायां गमने भग्ने च यावत् षण्मासं ।
तिष्ठन्ति निराहाराः कायोत्सर्गेण षण्मासं ॥

**एयारसंगधारी एआई धम्मसुक्कझाणी य ।**
**चत्तासेसकसाया मोणवई कंदरावासी ॥ १२२ ॥**

एकादशांगधारिणः एते धर्म्यशुक्लध्यानिनश्च ।
त्यक्ताशेषकषायाः मौनव्रताः कन्दरावासिनः ॥

**बहिरंतरगंथचुवा णिण्णेहा णिप्पिहा य जइवइणो ।**
**जिण इव विहरंति सया ते जिणकप्पे ठिया सवणा ॥१२३॥**

बाह्याभ्यन्तरग्रन्थच्युता निःस्नेहा निस्पृहाश्च यतिपतयः ।
जिना इव विहरन्ति सदा ते जिनकल्पे स्थिताः श्रमणाः ॥

**थविरकप्पो वि कहिओ अणयाराणं जिणेण सो एसो ।**
**पंचच्चेलच्चाओ अकिंचणत्तं च पडिलिहणं ॥ १२४ ॥**

स्थविरकल्पोऽपि कथितः अनगाराणां जिनेन स एषः ॥
पंचचेलत्यागोऽकिंचनत्वं च प्रतिलेखनं ॥

**पंचमहव्वयधरणं ठिदिभोयण एयभत्त करपत्तो ।**
**भत्तिभरेण य दत्तं काले य अजायणे भिक्खं ॥ १२५ ॥**

---

१ समिया. ख। २ अस्मादग्रेऽयं पाठः ख–पुस्तके ।

अडजवुंडजरोमजचर्म्मजवल्कजपंचचेलानि ।
परिहृत्य तृणजचेलं यो गृह्णीयान्न भवेत् स यतिः ॥ १ ॥
रजसेदाणमगहणं मद्दव सुकुमालदा लहुत्तं च ।
जत्थेदे पंचगुणा तं पडिलिहणं पसंसंति ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचमहाव्रतधारणं स्थितिभोजनं एकभक्तं करपात्रम् ।
भक्तिभरेण च दत्तं काले च अयाचना भिक्षा ॥

**दुविहतवे उज्जमणं छव्विहआवासएहिं अणवरयं ।**
**खिदिसयणं सिरलोओ जिणवरपडिरूवपडिगहणं ॥१२६॥**

द्विविधतपसि उद्यमनं षड्विधावश्यकैः अनवरतं ।
क्षितिशयनं शिरोलोचः जिनवरप्रतिरूपप्रतिग्रहणं ॥

**संहणणस्स गुणेण य दुस्समकालस्स तवपहावेण ।**
**पुरणयरगामवासी थविरे कप्पे ठिया जाया ॥ १२७ ॥**

संहननस्य गुणेन च दुःषमाकालस्य तपःप्रभावेन ।
पुरनगरग्रामवासिनः स्थविरे कल्पे स्थिता जाताः ॥

**उवयरणं तं गहियं जेण ण भंगो हवेइ चरियस्स ।**
**गहियं पुत्थयदाणं जोग्गं जस्स तं तेण ॥ १२८ ॥**

उपकरणं तद्गृहीतं येन न भंगो भवति चर्यायाः ।
गृहीतं पुस्तकदानं योग्यं यस्य तत्तेन ॥

**समुदाएण विहारो धम्मस्स पहावणं ससत्तीए ।**
**भवियाण धम्मसवणं सिस्साण य पालणं गहणं ॥ १२९ ॥**

समुदायेन विहारो धर्मस्य प्रभावनं स्वशक्त्या ।
भव्यानां धर्मश्रवणं शिष्यानां च पालनं ग्रहणं ॥

**संहणणं अइणिच्चं कालो सो दुस्समो मणो चवलो ।**
**तह वि हु धीरा पुरिसा महव्वयभरधरणउच्छाहिया ॥१३०॥**

सहननमतिनीचं कालः स दुःषमो मनश्चपलं ।
तथापि हि धीराः पुरुषा महाव्रतभारधारणोत्साहाः ॥

**वरिससहस्सेण पुरा जं कम्मं हणइ तेण काएण ।**
**तं संपइ वरिसेण हु णिज्जरयइ हीणसंहणणे ॥ १३१ ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षसहस्रेण पुरा यत्कर्म हन्यते तेन कायेन ।
तत्संप्रति वर्षेण हि निर्जरयति हीनसंहननेन ॥

**एवं दुविहो कप्पो परमजिणंदेहिं अक्खिओ णूणं ।**
**अण्णो पासंडिकओ गिहकप्पो गंथपरिकलिओ ॥ १३२ ॥**

एवं द्विविधः कल्पः परमजिनैः कथितो नूनं ।
अन्यः पाषण्डिकृतो गृहस्थकल्पो ग्रन्थपरिकलितः ॥

**दुद्धरतवस्स भग्गा परिसहविसएहिं पीडिया जे[1] य ।**
**जो गिहकप्पो लोए स थविकरकप्पो कओ तेहिं ॥ १३३ ॥**

दुर्धरतपसः भग्नाः परीषहविषयैः पीडिता ये च ।
यो गृहकल्पो लोके स स्थविरकल्पः कृतः तैः ॥

**णिग्गंथो जिणवसहो णिग्गंथं पवयणं कयं तेण ।**
**तस्साणुमग्गलग्गा सव्वे णिग्गंथमहरिसिणो ॥ १३४ ॥**

निर्ग्रन्थो जिनवृषभो निर्ग्रन्थं प्रवचनं कृतं तेन ।
तस्यानुमार्गलग्नाः सर्वे निर्ग्रन्थमहर्षयः ॥

**जे पुण भूसियगंथा दूसियणिग्गंथलिंगवयभट्टा ।**
**तेहिं सगंथं लिंगं पयडियं[2] तित्थणाहस्स ॥ १३५ ॥**

ये पुनर्भूषितग्रन्थाः दूषितनिर्ग्रन्थलिंगव्रतभ्रष्टाः ।
तैः सग्रन्थं लिंगं प्रकटितं तीर्थनाथस्य ॥

**जं जं संयमायरियं[3] तं तं णिरुआयमेण अलिएण ।**
**लोए वक्खाणित्ता अण्णाणी वंचिआ[4] तेहिं[5-6] ॥ १३६ ॥**

---

१ जेहिं ख । २ प ख । ३ समय क । ४ ओ क । ५ ण ख । ६ अस्मादग्रे इदं गाथासूत्रमुपलभ्यते––

णिग्गंथं दूसित्ता णिंदित्ता अप्पणं पसंसित्ता ।
जीवेइ मूढलोए कयमायं गहियबहुदव्वेहिं ॥ १ ॥

तत्तु अस्मिन् ग्रन्थे १५४ गाथासूत्रादग्रेऽस्ति, ख–पुस्तके तु पुनरपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् यत् स्वयमाचरितं तत्तत् निरागमेनालीकेन ।
लोके व्याख्याय अज्ञानिनो वंचितास्तै ॥ः

**छत्तीसे वरिससए विक्कमरायस्स मरणपत्तस्स ।**
**सोरट्ठे उप्पण्णो सेवडसंघो हु वलहीए ॥ १३७ ॥**

षट्त्रिंशति वर्षशते विक्रमराजस्य मरणप्राप्तस्य ।
सौराष्ट्रे उत्पन्नः श्वेतपटसंघो हि वल्लभीके ॥

**आसि उज्जेणिणयरे आयरिओ भद्दबाहु णामेण ।**
**जाणिय सुणिमित्तधरो भणिओ संघो णिओ तेण ॥ १३८ ॥**

आसीदुज्जयिनीनगरे आचार्यः भद्रबाहुः नाम्ना ।
ज्ञात्वा सुनिमित्तधरः भणितः संघो निजस्तेन ॥

**होहइ इह दुब्भिक्खं बारहवरसाणि जाम पुण्णाणि ।**
**देसंतराइं गच्छह णियणियसंघेण संजुत्ता ॥ १३९ ॥**

भविष्यतीह दुर्भिक्षं द्वादशवर्षाणि यावत्पूर्णानि ।
देशान्तराणि गच्छत निजनिजसंघेन संयुक्ताः ॥

**सोऊण इमं वयणं णाणादेसेहिं गणहरा सव्वे ।**
**णियणियसंघपउत्ता विहरीआ जत्थ सुब्भिक्खं ॥ १४० ॥**

श्रुत्वेदं वचनं नानादेशे गणधराः सर्वे ।
निजनिजसंघप्रयुक्ता विहृता यत्र सुभिक्षं ॥

**एक्कं[1] पुण संतिणामो संपत्तो वलहिणामणयरीए ।**
**बहुसीससंपउत्तो विसए सोरट्ठए रम्मे ॥ १४१ ॥**

एकः पुनः शान्तिनामा संप्राप्तः वल्लभीनामनगर्याम् ।
बहुशिष्यसंप्रयुक्तः विषये सौराष्ट्रे रम्ये ॥

---

१ ना ख । २ को ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्थ वि गयस्स जायं दुब्भिक्खं दारुणं महाघोरं[1] ।**
**जत्थ वियारिय उयरं खद्धो रंकेहि कूरुत्ति[2] ॥ १४२ ॥**

तत्रापि गतस्य जातं दुर्भिक्षं दारुणं महाघोरं ।
यत्र विदार्योदरं भक्षितः रंकैः क्रूर इति ॥

**तं लहिऊण णिमित्तं गहियं सव्वेहि कंबली दंडं ।**
**दुद्धियपत्तं च तहा पावरणं सेयवत्थं च ॥ १४३ ॥**

तल्लब्ध्वा निमित्तं गृहीतं सर्वैः कम्बलं दण्डं ।
दुग्धिकपात्रं च तथा प्रावरणं श्वेतवस्त्रं च ॥

**चत्तं रिसिआयरणं गहिया भिक्खा य दीणवित्तीए ।**
**उवविसिय जाइऊणं भुत्तं वसहीसु इच्छाए ॥ १४४ ॥**

त्यक्तं ऋष्याचरणं गृहीता भिक्षा च दीनवृत्या ।
उपविश्य याचयित्वा भुक्तं वसतिष्विच्छया ॥

**एवं वट्टंताणं कित्तियकालम्मि चावि परियलिए ।**
**संजायं सुब्भिक्खं जंपइ ता संतिआइरिओ ॥ १४५ ॥**

एवं वर्तमानानां कियत्काले चापि परिचलिते ।
संजातं सुभिक्षं जल्पति तान् शान्त्याचार्यः ॥

**आवाहिऊण संघं भणियं छंडेह कुत्थियायरणं ।**
**णिंदिय गरहिय गिण्हह पुणरवि चरियं मुणिंदाणं ॥१४६॥**

आहूय संघं भणितं त्यजत कुत्सिताचरणं ।
निंदत गर्हत गृह्णत पुनरपि चारित्रं मुनीन्द्राणां ॥

**तं वयणं सोऊणं उत्तं सीसेण तत्थ पढमेण[3] ।**
**को सक्कइ धारेउं एयं अइदुद्धरायरणं ॥ १४७ ॥**

---

१ भीमं ख । २ कूरोति ख । ३ जिनचन्द्रेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्वचनं श्रुत्वा उक्तं शिष्येन तत्र प्रथमेन ।
कः शक्नोति धर्तुं एतदतिदुर्धराचरणं ॥

**उववासो य अलाभे अण्णे दुसहाइं अंतरायाइं ।**
**एक्कट्ठाणमचेलं अज्जायण बंभचेरं च ॥ १४८ ॥**

उपवासं चालाभे अन्यानि दुःसहानि अन्तरायाणि ।
एकस्थानमचेलं अयाचनं ब्रह्मचर्यं च ॥

**भूमीसयणं लोचो वेवेमासेहिं असहणिज्जो हु ।**
**वावीसपरीसयाइं असहणिज्जाइं णिच्चं पि ॥ १४९ ॥**

भूमिशयनं लोचो द्विद्विमासेन असहनीयो हि ।
द्वाविंशतिपरीषहा असहनीया नित्यमपि ॥

**जं पुण संपइ गहियं एयं अम्हेहि किं पि आयरणं ।**
**इह लोए सुक्खयरं ण छंडिमो हु[1] दुस्समे काले ॥ १५० ॥**

यत्पुनः सम्प्रति गृहीतं एतत् अस्माभिः किमप्याचरणं ।
इह लोके सुखकरं न त्यजामो हि दुःषमे काले ॥

**ता संतिणा पउत्तं चरियपभट्ठेहिं जीवियं लोए ।**
**एयं ण हु सुंदरयं दूसणयं जइणमग्गस्स ॥ १५१ ॥**

तावत् शान्तिना प्रोक्तं चारित्रभ्रष्टानां जीवितं लोके ।
एतन्न हि सुन्दरं दूषणकं जैनमार्गस्य ॥

**णिग्गंथं पव्वयणं जिणवरणाहेण अक्खियं परमं ।**
**तं छंडिऊण अण्णं पवत्तमाणेण मिच्छत्तं ॥ १५२ ॥**

निर्ग्रन्थं प्रवचनं जिनवरनाथेन कथितं परमं ।
तत् त्यक्त्वा अन्यत्प्रवर्तमानेन मिथ्यात्वं ॥

---

१ नास्त्ययं ख–पुस्तके ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ता रूसिऊण पहओ सीसे सीसेण दीहदंडेण ।**
**थविरो घाएण मुओ जाओ सो विंतरो देवो ॥ १५३ ॥**

तावत् रुषित्वा प्रहतः शिरसि शिष्येण दीर्घदण्डेन ।
स्थविरो घातेन मृतः जातः स व्यन्तरो देवः ॥

**इयरो संघाहिवई पयडिय पासंड सेवडो जाओ ।**
**अक्खइ लोए धम्मं सग्गंथे अत्थि णिव्वाणं ॥ १५४ ॥**

इतरः संघाधिपतिः प्रकट्य पाषंडं श्वेतपटो जातः ।
कथयति लोके धर्मं सग्रन्थेऽस्ति निर्वाणं ॥

**सत्थाइं विरइयाइं णियणियपासंडगहियसरिसाइं ।**
**वक्खाणिऊण लोए पवित्तिओ तारिसायरणो ॥ १५५ ॥**

शास्त्राणि विरचितानि निजनिजपाषण्डगृहीतसदृशानि ।
व्याख्याय लोके प्रवर्तितं तादृशाचरणं ॥

**णिग्गंथं दूसित्ता णिंदित्ता अप्पणं पसंसित्ता ।**
**जीवेइ मूढलोए कयमायं गहिय बहुदव्वं[1] ॥ १५६ ॥**

निर्ग्रन्थं दूषयित्वा निन्दित्वा आत्मानं प्रशस्य ।
जीवति मूढलोके कृतमायं गृहीत्वा बहुद्रव्यं ॥

---

१ गहियं बहुं दव्वं. क । २ अस्मादग्रेऽयं पाठः । दर्शनसारादर्शैका—

**अण्णं च एवमाई आयमदुट्ठाइं मिच्छसत्थाइं ।**
**विरइत्ता अप्पाणं परिठवियं पढमए णरए ॥ १ ॥**

अन्यच्च एवमादीनि आगमदुष्टानि मिथ्याशास्त्राणि ।
विरच्यात्मानं प्रस्थापितं प्रथमे नरके ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इयरो विंतरदेवो संती लग्गो उवद्दवं काउं ।**
**जंपइ मा मिच्छत्तं गच्छह[1] लहिऊण जिणधम्मं ॥ १५७ ॥**

इतरो व्यन्तरदेवः शान्तिः लग्नः उपद्रवं कर्तुं ।
जल्पति मा मिथ्यात्वं गच्छत लब्ध्वा जिनधर्मं ॥

**भीएहिं तस्स पुआ अट्टविहा सयलदव्वसंपुण्णा ।**
**जा जिणचंदें रइया सा अज्ज वि दिण्णिया तस्स ॥१५८॥**

भीतेन तस्य पूजा अष्टविधा सकलद्रव्यसम्पूर्णा ।
या जिनचंद्रेण रचिता सा अद्यापि दीयते तस्मै ॥

**अज्ज वि सा वलिपूया पढमयरं दिंति तस्स णामेण ।**
**सो कुलदेवो उत्तो सेवडसंघस्स पुज्जो सो[2] ॥ १५९ ॥**

अद्यापि सा बलिपूजा प्रथमतरं दीयते तस्य नाम्ना ।
स कुलदेव उक्तः श्वेतपटसंघस्य पूज्यः सः ॥

**इय उप्पत्ती कहिया सेवडयाणं च मग्गभट्ठाणं ।**
**एत्तो उड्ढं[3] वोच्छं णिसुणह अण्णाणमिच्छत्तं ॥ १६० ॥**

एषा उत्पत्तिः कथिता श्वेतपटानां च मार्गभ्रष्टानां ।
इत ऊर्ध्वं वक्ष्ये निःशृणुत अज्ञानमिथ्यात्वं ॥

इति संशयमिथ्यात्वं चतुर्थं ।

---

१ हं क । २ प ख । ३ अस्माद्गाथासूत्रादग्रेऽयं पाठः ।

**णग्गो हरु अरहंतो रत्तो बुद्धो पियंबरो कण्हो ।**
**कच्छोटियाण बंभो को देवो कंबलावरणो ॥ १ ॥**
**रूपेण येन शिवमङ्गिगणः प्रयाति**
**तद्रूपमेव मनुजैः परिपूज्यतेऽत्र ।**
**सिद्धिर्यदि प्रभवतीह नितम्बिनीनां**
**तद्रूपिणः कथममी न जिना भवन्ति ॥ २ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मसयरपूरणरिसिणो उप्पण्णो पासणाहतित्थम्मि ।**
**सिरिवीरसमवसरणे अगहियझुणिणा णियत्तेण ॥ १६१ ॥**

मस्करिपूरणऋषिरुत्पन्नः पार्श्वनाथतीर्थे ।
श्रीवीरसमवशरणे अगृहीतध्वनिना निर्वृत्तेन ॥

**बहिणिग्गएण उत्तं मज्झं एयारसंगधारिस्स ।**
**णिग्गइ झुणी ण अरुहो[1] विणिग्गया[2] सा ससीसस्स ॥१६२॥**

बहिर्निर्गतेन उक्तं मह्यं एकादशांगधारिणे ।
निर्गच्छति ध्वनिं न अर्हन् विनिर्गता सा स्वशिष्याय ॥

**ण मुणइ जिणकहियसुयं संपइ दिक्खा य गहिय गोयमओ ।**
**विप्पो वेयब्भासी तम्हा मोक्खं ण णाणाओ ॥ १६३ ॥**

न जानाति जिनकथितं श्रुतं संप्रति दीक्षां च गृहीतः गौतमः ।
विप्रो वेदभाषी तस्मान्मोक्षो न ज्ञानतः ॥

**अण्णाणाओ मोक्खं एवं लोयाण पयडमाणो हु ।**
**देवो ण अत्थि[3] कोई सुण्णं झाएहं[4] इच्छाए ॥ १६४ ॥**

अज्ञानतो मोक्ष एवं लोकान् प्रकटमानो हि ।
देवो नास्ति कश्चिच्छून्यं ध्यायत इच्छया ॥

**एवं पंचवयारं[5] मिच्छत्तं सुग्गईणिवारणयं ।**
**दुक्खसहस्सावासं परिहरियव्वं पयत्तेण ॥ १६५ ॥**

एवं पंचप्रकारं मिथ्यात्वं सुगतिनिवारणकं ।
दुःखसहस्रावासं परिहर्तव्यं प्रयत्नेन ॥

**मिच्छत्तेणाच्छण्णो अणाइकालं चउग्गईभुवणे[6] ।**
**भमिओ दुक्खकंतो जीवो देहाइं गिण्हंतो ॥ १६६ ॥**

---

१ हे ख । २ णिग्गयावि क । ३ न क । ४ हि ख । ५ प ख । ६ भमणे ख । भवणे क ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यात्वेनाच्छन्नोऽनादिकालं चतुर्गतिभुवने ।
भ्रमितो दुःखाक्रान्तो जीवो देहान् गृह्णन् ॥

**एइंदियाइंपहुइ जावय पंचक्खविविहजोणीसु ।**
**भमिहइ भविस्सयाले पुणरवि मिच्छत्तपच्छइओ ॥१६७॥**

एकेन्द्रियप्रभृतिषु यावत्पंचाक्षविविधयोनिषु ।
भ्रमिष्यति भविष्यत्काले पुनरपि मिथ्यात्वप्रच्छादितः ॥

**अट्टरउद्दारूढो विसमे काऊण विविहपावाइं ।**
**अवियाणंतो धम्मं उप्पज्जइ तिरियणरएसु ॥ १६८ ॥**

आर्तरौद्रारूढो विषमानि कृत्वा विवधपापानि ।
अजानानः धर्मं उत्पद्यते तिर्यङ्नरकेषु ॥

**अहवा जह कहव पुणो पावइ मणुयत्तणं च संसारे ।**
**जुअसमिला[1] संजोए लहइ ण देसो कुलं आऊ ॥ १६९ ॥**

अथवा यथा कथमपि पुनः प्राप्नोति मनुष्यत्वं च संसारे ।
.......संयोगे लभते न देशं कुलं आयुः ॥

**पउरं आरोयत्तं इंदियपुण्णत्तणं च जोव्वणियं ।**
**सुंदररूवं लच्छी अच्छइ दुक्खेण तप्पंतो ॥ १७०॥**

प्रचुरमारोग्यत्वं इन्द्रियपूर्णत्वं च यौवनं ।
सुन्दररूपं लक्ष्मीं अर्थ्यते दुःखेन तप्यमानः ॥

**जइ कह वि हु एयाइं पावइ सव्वाइं तो ण पावेई ।**
**धम्मं जिणेण कहियं कुच्छियगुरुमग्गलग्गाओ ॥ १७१ ॥**

यदि कथमपि हि एतानि प्राप्नोति सर्वाणि तर्हि न प्राप्नोति ।
धर्मं जिनेन कथितं कुत्सितगुरुमार्गलग्नः ॥

इत्यज्ञानमिथ्यात्वं पंचमम् ।

---

१ जुयसमला ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कउलायरिओ अक्खइ अत्थि ण जीवो हु कस्स तं पावं ।**
**पुण्णं वा कस्स भवे को गच्छइ णरयसग्गं वा ॥ १७२ ॥**

कौलाचार्यः कथयति अस्ति न जीवो हि कस्य तत्पापं ।
पुण्यं वा कस्य भवेत् को गच्छति नरकस्वर्गं वा ॥

**जह गुडधादइजोए पिठरे जाएइ मज्जिरासत्ती ।**
**तह पंचभूयजोए चेयणसत्ती समुब्भवइ ॥ १७३ ॥**

यथा गुडधातकीयोगे पिठरे जायते मदिराशक्तिः ।
तथा पंचभूतयोगे चेतनाशक्तिः समुद्भवति ॥

**गब्भाईमरणंतं जीवो अत्थित्ति तं पुणो मरणं ।**
**पंचभूयाणणासे पच्छा जीवत्तणं णत्थि ॥ १७४ ॥**

गर्भादिमरणान्तं जीवोऽस्तीति तस्य पुनः मरणं ।
पंचभूतानां नाशे पश्चाज्जीवत्वं नास्ति ॥

उक्तं च—

**देहात्मिका देहकार्या देहस्य च गुणो मतिः ।**
**मतत्रयमिहाश्रित्य जीवाभावो विधीयते[1] ॥ १ ॥**

**तम्हा इंदियसुक्खं भुंजिज्जइ अप्पणाइं इच्छाए ।**
**खज्जइ पिज्जइ मज्जं मंसं सेविज्जइ परमहिलाए ॥ १७५ ॥**

तस्मादिन्द्रियसौख्यं भुज्यतां आत्मन इच्छया ।
खाद्यतां पीयतां मद्यं मांसं सेव्यतां परमहिलाः ॥

**जो इंदियाइं दंडइ विसया परिहरइ खवइ णियदेहं ।**
**सो अप्पाणं वंचइ गहिओ भूएहिं दुब्बुद्धी ॥ १७६ ॥**

---

१ अस्मादग्रेऽयं पाठोऽपि ख–पुस्तके । अथ वाक्यं–कालान्तरे भवान्तरे खरशशकाश्ववेसराणां शृङ्गाभावस्तथा जीवो नास्ति तस्मात्पुण्यपापाभावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य इन्द्रियाणि दण्डयति विषयान् परिहरति क्षपयति निजदेहं ।
स आत्मानं वञ्चयति गृहीतो भूतैः दुर्बुद्धिः ॥

उक्तं च—

**यावज्जीवेत् सुखं जीवेद्दणं कृत्वा घृतं पिबेत् ।**
**भस्मीभूतस्य कायस्य पुनरागमनं कुतः ॥ १ ॥**

इति चार्वाकमिथ्यात्वम् ।

---

**संखो पुणु मणइ इयं जीवो अत्थित्ति किरियपरिहीणो ।**
**देहम्मि णिवसमाणो ण लिप्पए पुण्णपावेहिं ।। १७७ ॥**

सांख्यः पुनः भणति एवं जीवोऽस्तीति क्रियापरिहीनः ।
देहे निवसमानो न लिप्यते पुण्यपापैः ॥

**छिज्जइ भिज्जइ पयडी पयडी परिभमइ दीहसंसारे ।**
**पयडी करेइ कम्मं पयडी भुंजेइ सुहदुक्खं ॥ १७८ ॥**

छिद्यते भिद्यते प्रकृतिः प्रकृतिः परिभ्रमति दीर्घसंसारे ।
प्रकृतिः करोति कर्म प्रकृतिः भुनक्ति सुखदुःखं ॥

**जीवो सया अकत्ता भुत्ता ण हु होइ पुण्णपावस्स ।**
**इय पयडिऊण लोए गहिया बहिणी सधूया वि ॥ १७९ ॥**

जीवः सदा अकर्ता, भोक्ता न हि भवति पुण्यपापस्य ।
इति प्रकट्य लोके गृहीता भगिनी स्वसुतापि ॥

**एए विसयासत्ता कम्गुम्मत्ता[1] य जीवदयरहिया[2] ।**
**परतियधणहरणरया अगहियधम्मा दुरायारा ॥ १८० ॥**

---

१ कम्मुमत्ता ख, कामोन्मत्ताः । २ मद्योन्मत्ताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते विषयासक्ताः कुगुमत्ताश्च जीवदयारहिताः ।
परस्त्रियधनहरणरता अगृहीतधर्मा दुराचाराः ॥

**ण मुणंति सयं धम्मं अमुणियतच्चत्थयारपब्भट्टा ।**
**पउरकसाया माई कह अण्णेसिं फुडं विंति ॥ १८१ ॥**

न जानन्ति स्वयं धर्मं अमुनिततत्वार्थाचारप्रभृष्टाः
प्रचुरकषाया मायाविनः कथं अन्यान् स्फुटं ब्रुवन्ति ॥

**रंडा मुंडा थंडी[1] सुंडी दिक्खिदा धम्मदारा**
**सीसे कंता कामासत्ता कामिया सा वियारा[2] ।**
**मज्जं मंसं मिट्टं भक्खं भक्खियं जीवसोक्खं[3] च ।**
**कउले धम्मे विसये रम्मे तं जि हो सग्गमोक्खं[4] ॥१८२॥**

रंडा मुण्डा स्थण्डी शौंडी दीक्षिता धर्मदाराः
शिष्या कान्ता कामासक्ता कामिता सा विकारा ।
मद्यं मासं मिष्टं भक्ष्यं भक्षितं जीवसुखं च ।
कपिले धर्मे विषये रम्ये तेनैव भवतः ? स्वर्गमोक्षौ ॥

**रत्तामत्ता कंता[5]सत्ता दूसियाधम्ममग्गा**
**दुट्टा कट्टा धिट्टा झुट्टा[6] णिंदि[7]जोमोक्खमग्गा ।**
**अक्खे सुक्खे अग्गे दुक्खे णिब्भरं दिण्णचित्ता**
**णेरइयाणं दुक्खट्टाणं तस्स सिस्सा पउत्ता ॥ १८३ ॥**

रक्तमत्ताः कान्तासक्ता दूषितधर्ममार्गाः
दुष्टा कष्टा धृष्टा अनृतवादिनः निन्दितमोक्षमार्गाः ।

---

१ चंडी ख । २ वियरो. क । ३ जीहसुखं. ख । ४ जिहो मोक्खसोक्खं. ख । ५ कामा ख । ६ डु क । ७ या ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आक्षे सुखे अग्रे दुःखे निर्भ्रान्तं दत्तचित्ताः

नारकाणां दुःखस्थानं तस्य शिष्याः प्रोक्ताः ॥

**मज्जे धम्मो मंसे धम्मो जीवहिंसाइं धम्मो ।**

**राई देवो दोसी[1] देवो माया सुण्णं[2] पि देवो**

**रत्तामत्ता कंतासत्ता जे गुरु ते वि य पुज्जा**

**हाहा कट्ठं णट्ठो लोओ[3] अट्टमट्टं कुणंतो ॥ १८४ ॥**

मद्ये धर्मो मांसे धर्मो जीवहिंसायां धर्मः ।

रागी देवो दोषी देवो माया शून्यमपि देवः ।

रक्तमत्ताः कान्तासक्ता ये गुरवस्तेऽपि च पूज्याः

हाहा कष्टं नष्टो लोकः अट्टमट्टं कुर्वन् ॥

**धूयमायरिवहिणि अण्णावि[4] पुत्तत्थिणि ।**

**आयति य वासवयणुपयडे वि विप्पें ।**

**जह रमियकामाउरेण वेयगव्वे उप्पण्णदप्पें ॥**

**बंभणि-छिंपिणि-डोंबि-नडिय-वरुडि-रज्जइ-चम्मारि ।**

**कवले समइ समागमइ[5] तह[6] भुत्ति य परणारि ॥१८५॥**

दुहितामातृभगिन्य अन्या अपि पुत्रार्थिनी ।

आयाति च व्यासवचनं प्रकटयति विप्रेण ।

यथा रमिता कामातुरेण वेदगर्वेणोत्पन्नदर्पेण ॥

ब्राह्मणी-डोम्बी-नटी-वरुटी-रजकी-चर्मकारी ।

कपिले समये समागच्छन्ती तथा भुक्ता च परनारी ॥

---

१ रो. ख । २ पु. ख । ३ ला. क । ४ ण्ण. क । ५ समागइ य । ६ य. क । ७ अस्मादाग्रेऽयं श्लोको वर्तते ।

स्वयमेवागतां नारीं यो न कामयते नरः ।

ब्रह्महत्या भवेत्तस्य पूर्वब्रह्माब्रवीदिदम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अण्णाणधम्मलग्गो जीवो दुक्खाण पूरिओ होइ ।**
**चउगइ गईहिं णिवडइ संसारे भमिहि हिंडंतो ॥ १८६ ॥**

अज्ञानधर्मलग्नो जीवो दुःखानां पूरितो भवति ।
चतुर्गतौ गतिभिः निपतति संसारे भ्रमति हिण्डन् ॥

**जह पाहाणतरंडे लग्गो पुरिसो हु तीरणीतोए ।**
**बुड्डइ विगयाधारो णिवडेइ महण्णवावत्ते ॥ १८७ ॥**

यथा पाषाणतरण्डे लग्नः पुरुषो हि तीरणीतोये ।
ब्रुडति विगताधारः निपतति महार्णवावर्ते ॥

**कुच्छियगुरुकयसेवा विविहावइपउरदुक्खआवत्ते ।**
**तह य णिमज्जइ पुरिसो संसारमहोवही भीमे ॥ १८८ ॥**

कुत्सितगुरुकृतसेवा विविधातिप्रचुरदुःखावर्ते ।
तथा च निमज्जति पुरुषः संसारमहोदधौ भीमे ॥

**वयभट्टकुंठरुद्देहिं णिट्ठुरणिक्किट्टदुट्टचिट्ठेहिं ।**
**अप्पाणं णासित्ता अण्णो वि य णासिओ लोगो ॥ १८९ ॥**

व्रतभ्रष्टकुंठरुद्रैः निष्ठुरनिकृष्टदुष्टचेष्टैः ।
आत्मानं नाशयित्वा अन्योऽपि च नाशितो लोकः ॥

**इय अण्णाणी पुरिसा कुच्छियगुरुकहियमग्गसंलग्गा ।**
**पावंति णरयतिरयं णाणादुहसंकडं भीमं ॥ १९० ॥**

इति अज्ञानिनः पुरुषाः कुत्सितगुरुकथितमार्गसंलग्नाः ।
प्राप्नुवंति नरकतिर्यंचं नानादुःखसंकटं भीमं ॥

**एवं णाऊण फुडं सेविज्जइ उत्तमो गुरू कोई ।**
**बहिरंतरगंथचुओ तिरियणवंतो सुणाणी य ॥ १९१ ॥**

---

५ रो ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं ज्ञात्वा स्फुटं सेव्यते उत्तमो गुरुः कश्चित् ।
बाह्यान्तर्ग्रन्थच्युतः तरणवान् सुज्ञानी च ॥

**जहजायलिंगधारी विसयविरत्तो य णिहयसकसाओ ।**
**पालियदिढबंभवओ सो पावइ उत्तमं सोक्खं ॥ १९२ ॥**

यथाजातलिंगधारी विषयविरक्तश्च निहतस्वकषायः ।
पालितदृढब्रह्मव्रतः स प्राप्नोति उत्तमं सौख्यं ॥

**तं कहियधम्मि लग्गा पुरिसा डहिऊण सकयपावाइं ।**
**पावंति मोक्खसोक्खं केई विलसंति सग्गेसु ॥ १९३ ॥**

तेन कथितधर्मे लग्नाः पुरुषा दग्ध्वा स्वकृतपापानि ।
प्राप्नुवन्ति मोक्षसौख्यं केचित् विलसन्ति स्वर्गेषु ॥

**एवं मिच्छादिट्ठीठाणं कहियं मया समासेण ।**
**एत्तो उड्ढं वोच्छं विदियं पुण सासणं णामं ॥ १९४ ॥**

एवं मिथ्यादृष्टिस्थानं कथितं मया समासेन ।
इत ऊर्ध्वं वक्ष्ये द्वितीयं पुनः सासादनं नाम ॥

मिच्छत्तं—इति मिथ्यात्वगुणस्थानम् ।

---

**एयदरस्स[1] उदए अणंतबंधिस्स संपरायस्स ।**
**समयाइछावलित्ति य एसो कालो समुद्दिट्ठो ॥ १९५ ॥**

एकतरस्योदयेऽनन्तानुबन्धिनः साम्परायस्य ।
समयादिषडावलीति च एषः कालः समुद्दिष्टः ॥

**एयम्मि[3] गुणट्ठाणे कालो णत्थित्ति तित्तिओ जम्हा ।**
**तम्हा वित्थारो ण हि संखेओ तेण सो[4] उत्तो ॥ १९६ ॥**

---

१ नायं पाठः उभय पुस्तके । २ एयदरस्सु उदएणय–ख. । ३ ख–पुस्तके १९६ गाथाया स्थाने १९७ गाथा, अस्याः स्थाने १९२ गा. । ४ इह ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतस्मिन् गुणस्थाने कालो नास्ति तावन्मात्रः यस्मात् ।
तस्माद्विस्तारो न हि संक्षेपेण तेन स उक्तः ॥

**परिणामियभावगयं विदियं सासायणं गुणट्ठाणं ।**
**सम्मत्तसिहरपडियं अपत्तमिच्छत्तभूमितलं ॥ १९७ ॥**

पारिणामिकभावगतं द्वितीयं सासादनं गुणस्थानं ।
सम्यक्त्वशिखरपतितं अप्राप्तमिथ्यात्वभूमितलं ॥

सासायणसम्मत्तं–इति सासादनसम्यक्त्वम् ।

---

**सम्मामिच्छुदएण य सम्मिस्सं णाम होइ गुणठाणं ।**
**खयउवसमभावगयं अंतरजाई समुद्दिट्ठं ॥ १९८ ॥**

सम्यक्त्वमिथ्यात्वोदयेन च संमिश्रं नाम भवति गुणस्थानं ।
क्षयोपशमभावगतं अन्तरजाति समुद्दिष्टं ॥

**वडवाए उप्पण्णो खरेण जह हवइ इत्थ वेसरओ ।**
**तह तं सम्मिस्सगुणं अगहियगिहसयलसंजमणं ॥ १९९ ॥**

वडवायां उत्पन्नः खरेण यथा भवति अत्र वेसरः ।
तथा स सम्मिश्रगुणः अगृहीतगृहिसकलसंयमः ॥

**तत्थ ण बंधइ आउं कुणइ ण कालो हु तेण भावेण ।**
**सम्मं वा मिच्छं वा पडिवज्जिय मरइ णियमेण ॥ २०० ॥**

तत्र न बध्नाति आयुः करोति न कालो हि तेन भावेन ।
सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते नियमेन ॥

**अट्टरउद्दं झायइ देवा सव्वे वि हुंति णमणीया ।**
**धम्मा सव्वे पवरा गुणागुणं किं पि ण विणिएइ ॥२०१॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आर्तं रौद्रं ध्यायति देवाः सर्वेऽपि भवन्ति नमनीयाः ।
धर्माः सर्वे प्रवरा गुणागुणौ किमपि न विजानाति ॥

**अत्थि जिणायमि कहियं वेए कहियं च हरिपुराणे वा ।**
**सइवागमेण कहियं तच्चं कविलेण कहियं च ॥ २०२ ॥**

अस्ति जिनागमे कथितं वेदे कथितं च हरिपुराणे वा ।
शैवागमेन कथितं तत्वं कपिलेन कथितं च ॥

**बंभो करेइ तिजयं किण्हो पालेइ उयरि छुहिऊणं ।**
**रुद्दो संहरइ पुणो पलयं काऊण णिस्सेसं ॥ २०३ ॥**

ब्रह्मा करोति त्रिजगत् कृष्णः पालयति उपरि स्पृशित्वा । ?
रुद्रः संहरति पुनः प्रलयं कृत्वा निःशेषं ॥

**जइ बंभो कुणइ जयं तो किं सग्गिंदरज्जकज्जेण ।**
**चइऊण बंभलोयं उग्गतवं तवइ णरलोए ॥ २०४ ॥**

यदि ब्रह्मा करोति जगत्तर्हि किं स्वर्गेन्द्रराज्यकार्येण ।
च्युत्वा ब्रह्मलोकं उग्रतपः तप्यते नरलोके ॥

**जरउंद्दसेयअंडय[1] सव्वे एयाइं भूयगामाइं ।**
**णारयणरतिरियसुरा णिवंदियं वेणिसुद्दपहुईया[2] ॥ २०५ ॥**

जरायुजोद्भित्स्वेदाण्डजान् सर्वान् एतान् भूतग्रामान् ।
नारकनरतिर्यक्सुरान् वंदिनः (?) वणिक्छूद्रप्रभृतीन् ॥

**चंडालडूंवधीवरवरुडाकल्लालछिंपिया चेव ।**
**हयगयगोमहिसिखरा वग्घकिडीसीहहरिणाइं ॥२०६॥**

चाण्डालडोम्बधीवरवरुटकलवारछिपकाश्चैव ।
हयगजगोमहिषीखरान् व्याघ्रकिटिसिंहहरिणान् ॥

---

१ य. ख । २ वणियवद्दिणिसुपहुईय. क ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

णाणा[1]कुलाइं जाई णाणाजोणी य आउविहवाइं ।
णाणादेहगयाइं वण्णा रूवाइं विविहाइं ॥ २०७ ॥

नानाकुलानि जातीः नानायोनीश्च आयुर्विभवादीनि ।
नानादेहगतान् वर्णान् रूपाणि विविधानि ॥

गिरिसरिसायरदीवो गामारामाइं धरणि आयासं ।
जो कुणइ खणद्धेणं चिंतियमित्तेण सव्वाइं ॥ २०८ ॥

गिरिसरित्सागरद्वीपान् ग्रामारामान् धरणीमाकाशं ।
यः करोति क्षणार्धेन चिन्तितमात्रेण सर्वान् ॥

किं सो रज्जणिमित्तं तवसा तावेइ णिच्च णियदेहं ।
तिहुवणकरणसमत्थो किं ण कुणइ अप्पणो रज्जं ॥ २०९ ॥

किं स राज्यनिमित्तं तपसा तापयति नित्यं निजदेहं ।
त्रिभुवनकरणसमर्थः किं न करोति आत्मनो राज्यं ॥

अच्छरतिलोत्तमाए णट्टं दट्ठूण रायरसरसिओ ।
तवभट्ठो चउवयणो जाओ सो मयणवसचित्तो ॥ २१० ॥

अप्सरस्तिलोत्तमाया नृत्यं दृष्ट्वा रागरसरसिकः ।
तपोभ्रष्टः चतुर्वदनः जातः स मदनवशचित्तः ॥

छंडिय णियवड्डुत्तं[2] पहुत्तणं[3] देवत्तणं तवोचरियं ।
कामाउरो अलज्जो लग्गो मग्गेण सो तिस्स ॥ २११ ॥

त्यक्त्वा निजबृहत्वं प्रभुत्वं देवत्वं तपश्चर्यं ।
कामातुरः अलज्जः लग्नः मार्गेण स तस्याः ॥

हसिओ सुरेहिं कुदो (ड्डो) खरसीसो भक्खिउं पउत्तो सो ।
संकरकरखुडियसिरो विरहपलित्तो णियत्तो य ॥ २१२ ॥

---

१ णाणाकुलजाइ तहा–ख. । २ भाषायां बडप्पन इति लक्ष्यते । ३ पहुत्त-देवत्तणं ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हसितः सुरैः क्रुद्धः खरशीर्षं भक्षितुं प्रवृत्तः सः ।
शंकरकरखंडितशिरः विरहापलिप्तो निवृत्तश्च ॥

**पविसेवि[1] णिज्जणवणं पिछिवि रिछी विरहिगओ तत्थ ।**
**सेवइ कामासत्तो तिलोत्तमा चित्ति धरिऊणं ॥ २१३ ॥**

प्रविश्य निर्जनवनं दृष्ट्वा ऋक्षीं विरहगतः तत्र ।
सेवते कामासक्तः तिलोत्तमां चेतसि धृत्वा ॥

**तस्सुप्पण्णो पुत्तो जंवेउ[2] णामेण लोयविक्खाओ ।**
**रिंछाण पई[3] जाओ भिच्चो सो रामएवस्स ॥ २१४ ॥**

तस्योत्पन्नः पुत्रो जम्बूः नाम्ना लोकविख्यातः ।
ऋक्षाणां पतिः जातः भृत्यः स रामदेवस्य ॥

**जो कुणइ जयमसेसं सो किं एक्का वि तारिसी महिला ।**
**सक्कइ ण विरइऊणं किं सेवइ णिग्घिणो रिच्छी ॥२१५॥**

यः करोति जगदशेषं स किं एकामपि तादृशीं महिलां ।
शक्नोति न विरचितुं किं सेवते निघृणः ऋक्षीं ॥

**वस्तुछन्दः ।**

**जो तिलोत्तम जो तिलोत्तम णियवि णच्चंति ।**
**वम्मह सरजरजरिउ चत्तणियमु चउवयणु जायउ ।**
**वणि णिवसइ परिभट्टतउ रमइ रिच्छि सुरयाण रायउ ॥**
**सो विरंचि कह संभवइ तयलोयउ कत्तारु ।**
**जो[4] अप्पा हु ण उत्तरइ फेडउ विरहवियारु ॥ २१६ ॥**

यः तिलोत्तमां यः तिलोत्तमां दृष्ट्वा नृत्यन्तीं ।
ब्रह्मा स्मरजर्जरितः त्यक्तनियमः चतुर्वदनः जातः ।
वने निवसति परिभ्रष्टतपाः रमते ऋक्षीं सुराणां राजा ॥

---

१ इ. ख. । २ जंवु ख । ३ हु ख । ४ जो अप्पाण हु ण उतरइ फेडइ ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स विरंचिः कथं संभवति त्रिलोकस्य कर्ता ।
य आत्मानं हि न तारयति स्फेटयति विरहविकारं ॥

**णत्थि धरा आयासं पवणाणलतोयजोयससिसूरा ।**
**जइ तो कत्थ ठिदेणं बंभा[1] रइयं[2] तिलोओत्ति ॥ २१७ ॥**

न सन्ति धरा आकाशं पवनानलतोयज्योतिःशशिसूर्याः ।
यदि तर्हि कुत्र स्थितेन ब्रह्मणा रचितः त्रिलोक इति ॥

**कत्तित्तं पुण दुविहं वत्थुअ कत्तित्त तह य विक्किरियं ।**
**घडपडगिहाइं पढमं विक्किरियं देवया[3]रइयं ॥ २१८ ॥**

कर्तृत्वं पुनः द्विविधं वस्तुनः कर्तृत्वं तथा च वैक्रियिकं ।
घटपटगृहादि प्रथमं वैक्रियिकं देवतारचितं ॥

**जइ तो वत्थुब्भूओ रइओ लोओ विरिंचिणा तिविहो ।**
**तो तस्स कारणाइं कत्थुवलद्धाइं दव्वाइं ॥ २१९ ॥**

यदि स वस्तुभूतो रचितो लोको विरांचिना त्रिविधः ।
तर्हि तस्य कारणानि कुत्र लब्धानि द्रव्याणि ॥

**अह विक्किरिओ रइओ विज्जाथा[4]मेण तेण बंभेण ।**
**कह थाइ दीहकालं अवत्थुभूओ अणिच्चोत्ति ॥ २२० ॥**

अथ विक्रियारचितो विद्यास्थाम्ना तेन ब्रह्मणा ।
कथं तिष्ठति दीर्घकालं अवस्तुभूतोऽनित्य इति ॥

**तम्हा ण होइ कत्ता बंभो सिरछेयविनडणं पत्तो ।**
**छलिओ तिलोत्तमाए सामण्णपुरिसुव्व असमत्थो ॥२२१॥**

तस्मान्न भवति कर्ता ब्रह्मा शिरश्छेदविनटनं प्राप्तः ।
छलितस्तिलोत्तमया सामान्यपुरुष इवासमर्थः ॥

---

१ म्हा ख । २ ओ. ख । ३ णा ख । ४ णा. ख । ५ सिरछेयणिवडाणं पत्तो क

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जो परमहिलाकज्जे छंडइ वडुत्तणं तओ णियमं ।**
**सो ण हवइ परमप्पा कह देवो हवइ पुज्जो य ॥ २२२ ॥**

य: परमहिलाकार्येण त्यजति बृहत्त्वं तपो नियमं ।
स न भवति परमात्मा कथं देवो भवति पूज्यश्च ॥

**सुपरिक्खिऊण तम्हा सुगवेसहं को वि परमबंभाणो ।**
**दहअट्ठदोसरहिओ वीयराओ परो णाणी ॥ २२३ ॥**

सुपरीक्ष्य तस्मात् सुगवेषय कमपि परमब्रह्माणं ।
दशाष्टदोषरहितं वीतरागं परं ज्ञानिनं ॥

**किण्णो[1] जइ धरइ जयं सूवररूवेण दाढअग्गेण ।**
**ता सो कहिं ठवइ पेए[2] कुम्मे कुम्मो वि कहिं ठाइं ॥२२४॥**

कृष्णो यदि धारयति जगत् शूकररूपेण दंष्ट्राग्रेण ।
तर्हि स कुत्र तिष्ठति पदे कूर्मे कूर्मोऽपि कुत्र तिष्ठति ॥

**अह छुहिऊण सउअरो तिजयं पालेइ महुमहो णिच्चं ।**
**किं सो तिजयबहित्थो तिजयबहित्थेण किं जाओ ॥ २२५ ॥**

अथ स्पर्शित्वा शूकरं ( ? ) त्रिजगत् पालयति मधुमदः नित्यं ।
किं स त्रिजगद्बहिस्थः त्रिजगद्बहिस्थेन किं जातं ॥

**जइया दहरहपुत्तो रामे (मो) णिवसेइ दंडरण्णम्मि ।**
**लंकाहिवेण छलिओ हरिया भज्जा पवंचेण ॥ २२६ ॥**

यत्र च दशरथपुत्रो रामो निवसति दण्डकारण्ये ।
लंकाधिपतिना छलित: हृता भार्या प्रपंचेन ॥

**विरहेण रुवइ विलवइ पडेइ उट्ठेइ णिंयइ[3] सोएइ ।**
**णउ मुणइ केण णाया पुच्छइ वणसावयाँ[4] मूढो ॥ २२७ ॥**

---

१ न्हो ख । २ ठइपए क । ३ व. क । ४ अस्मादग्रेऽयं श्लोकः ख-पुस्तके । ( अग्रे )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरहेण रोदिति विलपति पतति उत्तिष्ठति पश्यति स्वपिति।
न हि मनुते केन ज्ञातः पृच्छति वनशावकान् मूढः ॥

**जइ उवरत्थं तिजयं ता सो किं तत्थ वाणरा रिच्छा।**
**मेलाविऊण उवही वंधइ सेलेहिं सेउत्ति ॥ २२८ ॥**

यदि उपरि स्थितः त्रिजगतः तर्हि स किं तत्र वानरान् ऋक्षान्।
मेलापयित्वा उदधेः बध्नाति शैलैः सेतुमिति ॥

**किं पट्ठवेइ[1] दूवं जंपइ किं सामभेयदंडाइं।**
**अलहंतो किं जुज्जइ कोवं काऊण सत्थेहिं ॥ २२९ ॥**

किं प्रस्थापयति दूतं जल्पति किं सामभेददण्डानि।
अलभमानः किं युद्ध्यति कोपं कृत्वा शस्त्रैः ॥

**किं दहवयणो सीया गहिऊणं उवरबाहिरे थक्को।**
**जं हेलाइं ण तरइ रिउ हणिउं आणिउं भज्जा ॥ २३० ॥**

किं दशवदनः सीतां गृहीत्वा ....बहिः स्थितः।
यत् हेलया न शक्नोति रिपुं हत्वा आनेतुं भार्यां ॥

**जइ तिजयपालणत्थे संजाया तस्स एरिसी सत्ती।**
**तो किं तिजयं दड्ढं हरो(रे)णं[2] संपिच्छमाणस्स ॥ २३१ ॥**

यदि त्रिजगत्पालनार्थे संजाता तस्यैतादृशी शक्तिः।
तर्हि किं जिगत् दग्धं हरेण संप्रेक्षमाणस्य ॥

**जो ण जाणइ जो ण जाणइ हरिय पियभज्ज।**
**पुच्छइं वणसावयइं अह मुणेइ आणउं ण सक्कइ।**

---

**भो भो भुजंग ! तरुपल्लवलोलजिह्व बन्धूकपुष्पदलसन्निभलोहिताक्ष।**
**पृच्छामि ते पवनभोजिन् कोमलाङ्गी काचित्त्वया शरदचन्द्रमुखी न दृष्टा ॥१॥**

१ किं पट्ठावइ दूओ ख। २ हरिणे ख।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बंधेइ सायरु गिरिहिं पेसिऊण तहिं पवरभिच्चइं ॥**
**तासु उवरि णारायणहो किमु तिहुवणु णिवसेइ ।**
**जो वारवइ विणासियहो रक्खहु णा हिं तरेइ ॥ २३२ ॥**

यो न जानाति यो न जानाति हर्तारं निजभार्यायाः ।
पृच्छति वनशावकान् अथ जानाति आनेतुं न शक्नोति ।
बध्नाति सागरं गिरिभिः प्रेषयित्वा तत्र प्रवरभृत्यान् ।
तस्योपरि नारायणस्य (?) किं त्रिभुवनं निवसति ।
यो रिपुं विनाश्य रक्षितुं न हि शक्नोति ।

**जो देओ[1] होऊणं माणुसमत्तेहिं पंडुपुत्तेहिं ।**
**सारइ बोलाइत्तो जुज्झे [2]जेउं कओ तेहिं ॥ ॥ २३३ ॥**

यो देवो भूत्वा मनुष्यमात्रैः पाण्डुपुत्रैः ।
सारथिं कथयित्वा युद्धे जेतुं कथितः तैः ॥

**तम्हा ण होइ कत्ता किण्हो लोयस्स तिविहभेयस्स ।**
**मरिऊण वारवारं दहावयारेहिं अवयरइ ॥ २३४ ॥**

तस्मान्न भवति कर्ता कृष्णो लोकस्य त्रिविधभेदस्य ।
मृत्वा पुनः पुनः दशावतारैः अवतरति ॥

**एवं भणंति केई असरीरो णिक्कलो हरी सिद्धो ।**
**अवयरइ मच्चलोए देहं गिण्हेइ इच्छाए ॥ २३५ ॥**

एवं भणन्ति केचित् अशरीरो निष्कलो हरिः सिद्धः ।
अवतरति मर्त्यलोके देहं गृह्णातीच्छया ॥

**जइ तुप्पं णवणीयं णवणीयं पुण वि होइ जइ दुद्धं ।**
**तो सिद्धि गओ जीवो पुणरवि देहाइं गिण्हेइ ॥ २३६ ॥**

१ देवं क । २ जिओ कयं क ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि घृतं नवनीतं नवनीतं पुनरपि भवेद्यदि दुग्धं ।
तर्हि सिद्धिगतो जीवः पुनरपि देहादिकं गृह्णाति ॥

**रद्धो कूरो पुणरवि खित्ते खित्तो य होइ अंकूरो ।**
**जइ तो मोक्खं पत्ता जीवा पुण इंति संसारे ॥ २३७ ॥**

रद्धः क्रूरः पुनरपि क्षेत्रे क्षिप्तश्च भवेदंकुरः ।
यदि तर्हि मोक्षं प्राप्ताः जीवा पुनरायान्ति संसारे ॥

**जइ णिक्कलो महप्पा विण्हू णिस्सेसकम्ममलचत्तो ।**
**किं कारणमप्पाणं संसारे पुण वि पाडेइ ॥ २३८ ॥**

यदि निष्कलो महात्मा विष्णुः निःशेषस्त्रकर्ममलच्युतः ।
कि कारणमात्मानं संसारे पुनरपि पातयति ॥

**अहवा जइ कलसहिओ लो(इ)यवावारदिण्णणियचित्तो ।**
**तो संसारी णियमा परपप्पा हवइ ण हु विण्हू ॥ २३९ ॥**

अथवा यदि कलसहितो लोकव्यापरदत्तनिजचित्तः ।
तर्हि संसारी नियमात् परमात्मा भवति न हि विष्णुः ॥

**इय जाणिऊण णूणं णवणवदोसेहिं वज्जिओ विण्हू ।**
**सो अक्खइ[1] परमप्पा अणंतणाणी अराई य ॥ २४० ॥**

इति ज्ञात्वा नूनं नवनवदोषैर्वर्जितो विष्णुः ।
स कथ्यते परमात्मा अनन्तज्ञानी अरागी च ॥

**एवं भणंति केई रुद्दो संहरइ तिहुवणं सयलं ।**
**चिंतामित्तेण फुडं णरणारयतिरियसुरसहियं ॥२४१॥**

एवं भणन्ति केचित् रुद्रः संहरति त्रिभुवनं सकलं ।
चिन्तामात्रेण स्फुटं नरनारकतिर्यक्सुरसहितं ॥

---

१ उच्चेइ ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**णट्ठे असेसलोए पच्छा सो कत्थ चिट्ठदे रुद्दो ।**
**इक्को[1] तमंधयारो गोरी गंगा गया कत्थ ॥ २४२ ॥**

नष्टेऽशेषलोके पश्चात् स कुत्र तिष्ठति रुद्रः ।
एकस्तमोऽन्धकारः (?) गौरी गंगा गता कुत्र ॥

**जो डहइ एयगामं पावी लोएहिं वुच्चदे सो हु ।**
**जो पुण डहइ तिलोयं सो कह देवत्तणं पत्तो ॥ २४३[2] ॥**

यो दहति एकग्रामं पापी लोकैरुच्यते स हि ।
यः पुनः दहति त्रिलोकं स कथं देवत्वं प्राप्तः ॥

**जो हणइ एयगावी विप्पो वा सो वि इत्थ लोएहिं ।**
**गोबंभहच्चयारी पभणिज्जइ पावकारी सो ॥ २४४ ॥**

यः हन्ति एकां गां विप्रं वा सोऽपि अत्र लोकैः ।
गोब्रह्महत्याकारी प्रभण्यते पापकारी सः ॥

**जो पुण गोणारिपमुहे बाले बुड्ढे असंखलोयत्थे ।**
**संहारेइ असेसं तस्सेव हि किं भणिस्सामो ॥ २४५ ॥**

यः पुनः गोनारीप्रमुखान् बालान् वृद्धान् असंख्यलोकस्थान् ।
संहरति अशेषान् तमेव हि किं भणिष्यामः ॥

**अहवा जइ भणइ इयं सो देवो तस्स हवइ ण हु पावं ।**
**तो बंभसीसछेए बंभहच्चा कहं जाया ॥ २४६ ॥**

अथवा यदि भणतीदं स देवः तस्य भवति न हि पापं ।
तर्हि ब्रह्मशिरश्छेदे ब्रह्महत्या कथं जाता ॥

**किं हड्डमुंडमाला खंधे परिवहइ धूलिधूसरिओ ।**
**परिभमिओ तित्थाइं णरह[3] कवालम्मि भुंजंतो ॥ २४७ ॥**

---

१ एको ख. । २ ए ख. । ३ नर ख. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं अस्थिमुण्डमालां स्कन्धे परिवहति धूलिधूसरितः ।
परिभ्रमितस्तीर्थानि नरस्य कपाले भुञ्जानः ॥

**तह वि ण सा बंभहच्चा फिट्टइ रुद्दस्स जामता गामे ।**
**वसिओ पलासणणामे ता विप्पो णियवलद्देण ॥ २४८ ॥**

तथापि न सा ब्रह्महत्या स्फिटति रुद्रस्य यावत् ग्रामे ।
उषितः पलाशनाम्नि तत्र विप्रः निजबलत्वेन ? ॥

**णिहओ सिंगेण मुओ वसहो सेओ विकसणु संजाओ ।**
**वाणारसिं च पत्तो रुद्दो वि य तस्स मग्गेण ॥ २४९ ॥**

निहतः शृंगेन मृतः वृषभः श्वेतः कृष्णः संजातः ।
वाराणसीं प्राप्तः रुद्रोऽपि च तस्य मार्गेण ॥

**गंगाजलं पविट्ठा चत्ता ते दो वि बंभहच्चाए ।**
**रुद्दस्स करयलाओ तइयं पडियं कवालोत्ति ॥ २५० ॥**

गंगाजले प्रविष्टौ त्यक्तौ तौ द्वावपि ब्रह्महत्यया ।
रुद्रस्य करे लग्नं तत्र पतितं कपालमिति ॥

**जस्स गुरू सुरहिसुओ गंगातोएण फिट्टए हच्चा ।**
**सो देवो अण्णस्स य फेडइ कह संचियं पावं ॥ २५१ ॥**

यस्य गुरुः सुरभिसुतः गंगातोयेन स्फिट्यते हत्या ।
स देवोऽन्यस्य च स्फेटयति कथं संचितं पापं ॥

**जो ण तरइ[1] णियपावं गहियवओ अप्पणस्स फेडेउं ।**
**असमत्थो सो णूणं कत्तित्तविणासणे रुद्दो ॥ २५२ ॥**

यो न शक्नोति निजपापं गृहीतव्रतः आत्मनः स्फेटयितुं ।
असमर्थः स नूनं कर्तृत्वविनाशने रुद्रः ॥

---

१ शकेस्तरतीरपारचआः इत्यनेन शकेस्तरआदेशः ति प्रत्यये सति तरइ इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णो बंभा कुणइ जयं किण्हो ण धरेइ हरइ णउ रुद्दो ।
एसो सहावसिद्धो णिच्चो दव्वेहिं संछण्णो ॥ २५३ ॥

न ब्रह्मा करोति जगत् कृष्णः न धरति हरति न च रुद्रः ।
एष स्वभावसिद्धः नित्यः द्रव्यैः संछन्नः ॥

वस्तुच्छन्दः ।

भमइ णग्गउ भमइ णग्गउ वसइ[1] सुमसाणि ।
णररुंडसिरमंडियउ, णरकवालि भिक्खाइं भुंजेइ[2] ।
सहयारिउ गउरियहिं दुक्खभारु अप्पहो णिउंजइ ॥
जो बंभणेहं सिरकमले खुडिए न फेडइ दोसु ।
सो इसरु कह अवहरइ तिहुवणु करइ असेसु ॥२५४॥

भ्रमति नग्ने भ्रमति नग्ने वसति श्मशाने ।
नररुण्डशिरोमण्डितः नरकपाले भिक्षां भुनक्ति ।
सहकृतः गौरिभिः दुःखभारे आत्मानं नियुंक्ते ॥
यो ब्रह्मणः शिरःकमले खंडिते न स्फेटयति दोषं ।
स ईश्वरः कथमपहरति त्रिभुवनं करोति अशेषं ॥

वस्तुच्छदः ।

उत्तरंतउ उत्तरंतउ पवरसुरसरिहिं ।
पारासुर[3] चलिउ मणु मुए[4] लज्जकेवट्टणंदिणि[5] ।
आलिंगिय तपहेउ वरिवासजाउ तावसु महामुणि ।
भारहु पुणु हुउ दोवहिं केसग्गहपव्वेण ।
जिणु मिलिवि[6] के केण जगिं णिवडिय चवलमणेण ॥२५५॥

---

१ णग्गउ समइ क. । २ विभुंजइ । ३ पानासुतु क. । ४ य. क । ५ इ. ख ।
६ मोलिवि क ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अण्णाणि य रइयाइं एत्थ पुराणाइं अघडमाणाइं ।**
**सिद्धंतेहिं अजुत्तं पुव्वावरदोससंकिण्णं[1] ॥ २५६ ॥**

अन्यानि च रचितान्यत्र पुराणानि अघटमानानि ।
सिद्धान्तैरयुक्तं पूर्वापरदोषसंकीर्णं ॥

**एएं[2] उत्ते देवे सव्वे सद्दहइ जो पुराणेहिं ।**
**अरिहंता[3] परिचाए सम्मामिच्छोत्ति णायव्वो ॥ २५७ ॥**

एतानुक्तान् देवान् सर्वान् श्रद्दधाति यः पुराणैः ।
अर्हतः परित्यज्य सम्यङ्मिथ्यात्वं इति ज्ञातव्यः ॥

**एसो सम्मामिच्छो परिहरियव्वो हवेइ णियमेण ।**
**एत्तो अविरई[4]सम्मो कहिज्जमाणो णिसामेह ॥ २५८ ॥**

एतत्सम्यग्मिथ्यात्वं परिहर्तव्यं भवति नियमेन ।
इत अविरतसम्यक्त्वं कथयिष्यमाणं निशृणुत ॥

इति मिश्रगुणस्थानम् ।

---

**हवइ चउत्थं ठाणं अविरई[5]सम्मोत्ति णामयं भणियं ।**
**तत्थ हु खइओ भावो खयउवसमिओ समो[6] चेव ॥ २५९ ॥**

भवति चतुर्थं स्थानमविरतसम्यक्त्वमिति नामकं भणितं ।
तत्र हि क्षायिको भावः क्षायोपशमिकः शमश्चैव ॥

---

१ अस्मादग्रेऽयं पाठः ख—पुस्तके । उक्तं च—

ब्रह्मा अल्पायुषोऽयं हरिर्विधिवशाद्गोपतिर्गर्भवासे
चन्द्रः क्षीणप्रतापी भ्रमति दिनकरो देवमिथ्याभिमानी ।
कामः कायाविहीनश्चलगातिपवनो विश्वकर्मा दरिद्री
इन्द्राद्या दुःखपूर्णाः सुखनिधिसुभगः पातु नः पार्श्वनाथः ॥१॥

२ एए देवा सव्वे सद्दहइ य कोइ पुराणेहिं ख । ३ तो. क । ४-५ य ख ।
६ उवसमो. क ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**एए तिण्णि वि भावा दंसणमोहं पडुच्च भणिआ हु ।**
**चारित्तं णत्थि जदो अविरयअंतेसु ठाणेसु ॥ २६० ॥**

एते त्रयोऽपि भावा दर्शनमोहं प्रतीत्य भणिता हि ।
चारित्रं नास्ति यतः अविरतान्तेषु स्थानेषु ॥

**णो इंदिएसु विरओ णो जीवे थावरे तसे वा वि ।**
**जो सद्दहइ जिणुत्तं अविरइसम्मोत्ति णायव्वो ॥ २६१ ॥**

नो इन्द्रियेषु विरतो नो जीवे स्थावरे त्रसे वापि ।
यः श्रद्दधाति जिनोक्तं अविरतसम्यक्त्व इति ज्ञातव्यः ॥

**हिंसारहिए धम्मे अट्ठारहदोसवज्जिए देवे ।**
**णिग्गंथे पव्वयणे सद्दहणं होइ सम्मत्तं ॥ २६२ ॥**

हिंसारहिते धर्मे अष्टादशदोषवर्जिते देवे ।
निर्ग्रन्थे प्रवचने श्रद्धानं भवति सम्यक्त्वं ॥

**संवेओ णिव्वेओ णिंदा गरुहाइं उवसमो भत्ती ।**
**वच्छल्लं अणुकंपा अट्ठगुणा होंति सम्मत्ते ॥ २६३ ॥**[1]

संवेगो निर्वेगो निन्दा गर्हा उपशमो भक्तिः ।
वात्सल्यं अनुकम्पा अष्टौ गुणा भवन्ति सम्यक्त्वे ॥

---

१ अस्य गाथासूत्रस्येयं ख–पुस्तके व्याख्या वर्तते—

धर्मे सानुरागता संवेगः १ । शरीरादिविषये सदा विरागता निर्वेगः ( दः ) २ । आत्मसाखि( क्षि )निन्दाकरणं निन्दा ३ । गुरुसाखि ( क्षि ) कृतदोषनिराकरणं गरुहा (गर्हा) ४ । क्रोधादिपंचविंशतिकषायपरित्यजनमुपशमः ५ । दर्शनज्ञानचारित्रतपोविनयकरणं भक्तिः ६ । व्रतधारणकारण वात्सल्यं वत्सलता ७ । षट्जीवनिकायस्य दयाकारणमनुकम्पा ८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दुविहं[1] तं पुण भणियं अहवा तिविहं कहंति आयरिया ।**
**आणाए अधिगमे वा सद्दहणं जं पयत्थाणं ॥ २६४ ॥**

द्विविधं तत्पुनः भणितं अथवा त्रिविधं कथयन्त्याचार्याः ।
आज्ञया अधिगमेन वा श्रद्धानं यत् पदार्थानां ॥

**खयउवसमं च खइयं उवसमसम्मत्त पुणु च उद्दिट्ठं ।**
**अविरइ विरयाणं पि य विरयाविरयाण ते हुंति ॥ २६५ ॥**

क्षयोपशमं च क्षायिकं उपशमं सम्यक्त्वं पुनश्चोद्दिष्टं ।
अविरतानां विरतानामपि च विरताविरतानां तानि भवन्ति ॥

**कोहचउक्कं पढमं अणंतबंधीणिणामयं भणियं ।**
**सम्मत्तं मिच्छत्तं सम्मामिच्छत्तयं तिण्णि ॥ २६६ ॥**

क्रोधचतुष्कं प्रथमं अनन्तानुबन्धिनामकं भणितं ।
सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वं त्रीणि ॥

**एएसिं सत्तण्हं उवसमकरणेण उवसमं भणियं ।**
**खयओ खइयं जायं अचलत्तं णिम्मलं सुद्धं ॥ २६७ ॥**

एतेषां सप्तानामुपशमकरणेन उपशमं भणितं ।
क्षयतः क्षायिकं जातं अचलत्वं निर्मलं शुद्धं ॥

**उदयाभाओ[2] जत्थ य पयडीणं ताण सव्वघादीणं ।**
**छण्णाण उवसमो वि य उदओ सम्मत्तपयडीए ॥ २६८ ॥**

उदयाभावो यत्र च प्रकृतीनां तासां सर्वघातिनीनां ।
षण्णां उपशमोऽपि च उदयः सम्यक्त्वप्रकृतेः ॥

**खयउवसमं पउत्तं सम्मत्तं परमवीयराएहिं ।**
**उवसमियपंकसरिसं णिच्चं कम्मक्खवणहेउं ॥ २६९ ॥**

क्षयोपशमं प्रोक्तं सम्यक्त्वं परमवीतरागैः ।
उपशमितपंकसदृशं नित्यं कर्मक्षपणहेतुः ॥

---

१ तिविहं क । २ वो. ख ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जो ण हि मण्णइ एयं खयउवसमभावजो य सम्मत्तं ।**
**सो अण्णाणी मूढो तेण ण णायं समयसारं ॥ २७० ॥**

यो न हि मन्यते एतत् क्षयोपशमभावजं च सम्यक्त्वं ।
स अज्ञानी मूढस्तेन न ज्ञातं समयसारं ॥

**जम्हा पंचपहाणा भावा अत्थित्ति सुत्तणिद्दिट्ठा ।**
**तम्हा खयउवसमिए भावे जायं तु तं जाणे ॥ २७१ ॥**

यस्मात् पंचप्रधाना भावाः सन्तीति सूत्रनिर्दिष्टाः ।
तस्मात् क्षयोपशमेन भावेन जातं तु तत् ज्ञातव्यं ॥

**तं सम्मत्तं उत्तं जत्थ पयत्थाण होइ सद्दहणं ।**
**परमप्पइं[1]कहियाणं परमप्पा दोसपरिचत्तो ॥ २७२ ॥**

तत्सम्यक्त्वमुक्तं यत्र पदार्थानां भवति श्रद्धानं ।
परमात्मकथितानां परमात्मा दोषपरित्यक्तः ॥

**दोसा छुहाइ भणिया अट्ठारस होंति तिविहलोयम्मि ।**
**सामण्णा सयलजणे तेसिमभावेण परमप्पा ॥ २७३॥**

दोषा क्षुधादयो भणिता अष्टादश भवन्ति त्रिविधलोके ।
सामान्या सकलजने तेषामभावेन परमात्मा ॥

**सो पुण दुविहो भणियो सयलो तह णिक्कलुत्ति णायव्वो ।**
**सयलो अरुहसरूवो सिद्धो पुण णिक्कलो भणिओ ॥२७४॥**

स पुनः द्विविधो भणितः सकलस्तथा निष्कल इति ज्ञातव्यः ।
सकलोऽर्हद्रूपः सिद्धः पुनः निष्कलो भणितः ॥

**जस्स ण गोरी गंगा कावालं णेव विसहरो कंठे ।**
**ण य दप्पो कंदप्पो सो अरुहो भण्णए रुद्दो ॥ २७५ ॥**

---

१ य ख।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य न गौरी गंगा कपालं नैव विषधरः कण्ठे।
न च दर्पः कन्दर्पः सोऽर्हन् भण्यते रुद्रः ॥

**जस्स ण गया ण चक्कं णो संखो णेय गोविसंघाओ।**
**णावयरइ[1] दहवयारे सो अरुहो भण्णए विण्हू[2] ॥ २७६ ॥**

यस्य न गदा न चक्रं न शंखः नैव गोपीसंघातः।
नावतरति दशावतारे सोर्हन् भण्यते विष्णुः ॥

**ण तिलोत्तमाए छलिओ ण य वयभट्ठो ण चउमुहो जादो।**
**ण य रिछीए रत्तो सो अरुहो वुच्चए बंभो ॥ २७७ ॥**

न तिलोत्तमया छलितो न च व्रतभ्रष्टो न चतुर्मुखो जातः।
न ऋक्ष्यां रक्तः सोर्हन् उच्यते ब्रह्मा ॥

**तेणुत्तणवपयत्था अण्णे पंचत्थिकायछद्व्वा।**
**आणाए अधिगमेण य सद्दहमाणस्स सम्मत्तं ॥ २७८ ॥**

तेनोक्तनवपदार्थान् अन्यानि पंचास्तिकायषड्द्रव्यानि।
आज्ञयाधिगमेन च श्रद्दधानस्य सम्यक्त्वं ॥

**संकाइदोसरहियं णिस्संकाईगुणज्जुअं परमं।**
**कम्मणिज्जरणहेउं[3] तं सुद्धं होइ सम्मत्तं ॥ २७९ ॥**

शंकादिदोषरहितं निःशंकादिगुणयुतं परमं।
कर्मनिर्जराहेतु तच्छुद्धं भवति सम्यक्त्वं ॥

**रायगिहे णिस्संको चोरो णामेण अंजणो भणिओ।**
**चंपाए णिक्कंखा वणिधूवा णंतमइ णामा ॥ २८० ॥**

राजगृहे निःशंकश्चोरो नाम्ना अंजनो भणितः।
चम्पायां निष्कांक्षा वणिक्सुतानन्तमन्ती नाम ॥

---

१ हवइ. ख। २ विन्हू. ख। ३ ओ. क.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिव्विदिगिंछो राया उद्दायणो णाम रउरवे[1] णयरे ।
रेवइ महुराणयरे अमूढदिट्ठी मुणेयव्वा ॥ २८१ ॥

निर्विचिकित्सो राजा उद्दायनो नाम रौरवे नगरे ।
रेवती मथुरानगरे अमूढदृष्टिर्मन्तव्या ॥

ठिदिकरणगुणपउत्तो मगहाणयरम्मि वारिसेणो हु ।
हत्थिणपुरम्मि णयरे वच्छल्लं विण्हुणा रइयं ॥ २८२ ॥

स्थितीकरणगुणप्रयुक्तो मगधानगरे वारिषेणो हि ।
हस्तिनापुरे नगरे वात्सल्यं विष्णुना रचितं ॥

उवगूहणगुणजुत्तो जिणदत्तो णाम तामलित्तिणयरीए ।
वज्जकुमारेण कया पहावणा चेय महुराए ॥ २८३ ॥

उपगूहनगुणयुक्तो जिनदत्तो नाम ताम्रलिप्तिनगर्या ।
वज्रकुमारेण कृता प्रभावना चैव मथुरायां ॥

एरिसगुणअट्ठजुयं सम्मत्तं जो धरेइ दिढचित्तो[2] ।
सो हवइ सम्मदिट्ठी सद्दहमाणो पयत्थाण ॥ २८४ ॥

एतादृशाष्टगुणयुक्तं सम्यक्त्वं यो धारयति दृढचित्तः ।
स भवति सम्यग्दृष्टिः श्रद्दधानः पदार्थानां ॥

ते पुणु जीवाजीवा पुण्णं पावो[3] य आसवो य तहा ।
संवर णिज्जरणं पि य बंधो मोक्खो य णव होंति ॥ २८५ ॥

ते पुनः जीवाजीवौ पुण्यं पापश्च आस्रवश्च तथा ।
संवरो निर्जरापि च बन्धो मोक्षश्च नव भवन्ति ॥

---

१ वरवे. ख. । वसुनन्दिश्रावकाचारे तु रुद्दवरणयरे इति पाठः । रुद्रवरनगरे ।
२ अव क. त्ते. ख. । ३ पुण्णा पावा य क. ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**जीवो अणाइ णिच्चो उवओगसंजुदो देहमित्तो य ।**
**कत्ता भोत्ता[1] चेत्ता[2] ण हु मुत्तो सहावउड्ढगई ॥ २८६ ॥**

जीवोऽनादिः नित्यः उपयोगसंयुतो देहमात्रश्च ।
कर्ता भोक्ता चेतयता न तु मूर्तः स्वभावोर्ध्वगतिः ॥

**पाणचउक्कपउत्तो जीवस्सइ जो हु जीविओ पुव्वं ।**
**जीवेइ वट्टमाणं जीवत्तणगुणसमावण्णो ॥ २८७ ॥**

प्राणचतुष्कप्रयुक्तः जीविष्यति यो हि जीवितः पूर्वं ।
जीवति वर्तमाने जीवत्वगुणसमापन्नः ॥

**पज्जाएण वि तस्स हु दिट्ठा आवत्ति[3] देहगहणम्मि ।**
**अधुवत्तं पुण दिट्ठं देहस्स विणासणे तस्स[4] ॥ २८८ ॥**

पर्यायेनापि तस्य हि दृष्टा आवृत्तिः देहग्रहणे ।
अध्रुवत्वं पुनः दृष्टं देहस्य विनाशने तस्य ॥

**सायारो अणयारो उवओगो दुविहभेयसंजुत्तो ।**
**सायारो अट्ठविहो चउप्पयारो अणायारो ॥ २८९ ॥**

साकारोऽनाकर उपयोगो द्विविधभेदसंयुक्तः ।
साकारोऽष्टविधः चतुष्प्रकारोऽनाकरः ॥

**मइसुइउवहिविहंगा अण्णाणजुत्ताणि तिण्णि णाणाणि ।**
**सम्मण्णाणाणि पुणो केवलदिट्ठाणि पंचेव ॥ २९० ॥**

मतिश्रुतावधिविभंगानि अज्ञानयुक्तानि त्रीणि ज्ञानानि ।
सम्यग्ज्ञानानि पुनः केवलदृष्टानि पंचैव ॥

---

१ भुत्ता ख. । २ वेत्ता ख । ३ इ ख. । ४ इयं ख—पुस्तके २८७ गाथातः पूर्वं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मइणाणं सुइणाणं उवही मणपज्जयं च केवलयं ।**
**तिण्णि सया छत्तीसा मई सुयं पुण[1] बारसंगगयं ॥ २९१ ॥**

मतिज्ञानं श्रुतज्ञानमवधिः मनःपर्ययः च केवलं ।
त्रीणि शतानि षट्त्रिंशत् मतिः, श्रुतं पुनः द्वादशाङ्गगतं ॥

**देसावहि परमावहि सव्वावहि अवहि होइ तिभेया ।**
**भवगुणकारणभूया णायव्वा होइ णियमेण[2] ॥ २९२ ॥**

---

१ सुयं च वा. क । २ अस्माद्गाथासूत्रादग्रे ख-पुस्तके ईदृक्पाठो वर्तते । अत्र ग्रन्थान्तरादज्ञानत्रयमाह—

**अदेवं मन्यते देवमव्रतं मन्यते व्रतं ।**
**अतत्वे तत्वविज्ञानं कुमतिर्मन्यते बुधैः ॥ १ ॥**
**सर्वज्ञशासने द्वेष्टा कुशास्त्रेषु सदा रतिः ।**
**मद्यमांसे बुभुक्षेच्छा श्रुतौ स नरोऽधमः ? ॥ २ ॥**

अथ जम्बूद्वीपे भरतक्षेत्रे आर्यखण्डे अहिच्छत्रपुरे ब्राह्मणः शिवशर्मा नाम व्रतनियमोपेतो विभंगावधिसंजातः । एकदा पितृपक्षे निजपुत्रस्याज्ञा दत्ता— समीपे न्यग्रोधमाश्रित्य कृष्णमृग एकस्तिष्ठति, मृगं व्यापादयित्वा शीघ्रेणागच्छ हे पुत्र ! । वटुकस्तत्रैव प्राप्तः, मृगसमूहं दृष्ट्वा विस्मयं गतः, पुनर्दिशावलोकनं कृत्वा तस्मिन् स्थाने मुनिं दृष्ट्वा नमस्कारं कृत्वा पृच्छति स्म—भगवन् ! मृगनिचयो युष्मत्पार्श्वे स्थितो मत्पित्रा कथं ज्ञातः ? ज्ञानप्रभावान्मुनिरुक्तवान्—तव पितुर्विभंगावधिः संजातः, असंयमार्थेन जानाति । मुनिवचनं श्रुत्वा स वेगस्तत्रैव गत्वा नमस्कृत्वा जनकमुपविष्टः । स पितरं पृच्छति—तस्मिन् स्थाने किं कोऽपि मानवकः अस्ति ? स कथयति न हि । पुत्रः कथयति—मृगसमूहस्तिष्ठति, कोऽपि यतिरस्ति किं वा नास्तीति ? तद्वचनं श्रुत्वा मुहुर्मुहुरवलोक्य तेनोक्तं एकः स एव तिष्ठति नान्यः कश्चित् । गुरुवचनं श्रुत्वा शीघ्रेण मुनिसमीपं गतः । मुनिपार्श्वे मुनिरभूत् । स्वर्गं गतः । स विप्रो रौद्रेण मृत्वा नरकं गतश्चेति, विभंगावधिश्चेति ।

२९१ गाथासूत्रस्यापि ख-पुस्तके व्याख्या वर्तते । सा चात्र नोद्धृता । तत्वार्थराजवार्तिकादौ यः पाठः ज्ञानानां विषये स एवात्रोल्लिखितः वर्तते, अतः तत्रैवावलोकनीय इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशावधिः परमावधिः सर्वावधिः अवधिः भवति त्रिभेदः ।
भवगुणकारणभूतः ज्ञातव्यो भवति नियमेन ॥

**मणपज्जवं च दुविहं रिउविउलमई तहेव णायव्वं ।**
**केवलणाणं एक्कं सव्वत्थ पयासयं णिच्चं ॥ २९३ ॥**

मनःपर्ययश्च द्विविधः ऋजुविपुलमती तथैव ज्ञातव्यः ।
केवलज्ञानं एकं सर्वत्र प्रकाशकं नित्यं ॥

**एसो अट्ठपयारो णाणुवओगो हु होइ सायारो ।**
**चक्खु अचक्खू ओही केवलसहिओ अणायारो ॥ २९४ ॥**

एषोऽष्टप्रकारो ज्ञानोपयोगो हि भवति साकारः ।
चक्षुरचक्षुरवधिः केवलसहितोऽनाकारः ॥

**जम्मि भवे जं देहं तम्मि भवे तप्पमाणओ अप्पा ।**
**संहारवित्थरगुणो केवलणाणीहि उद्दिट्ठो ॥ २९५ ॥**

यस्मिन् भवे यो देहः तस्मिन् भवे तत्प्रमाण आत्मा ।
संहारविस्तारगुणः केवलज्ञानिभिः उद्दिष्टः ॥

**जो कत्ता सो भुत्ता ववहारगुणेण होइ कम्मस्स ।**
**ण हु णिच्छएण भणिओ कत्ता भोत्ता य कम्माणं ॥२९६॥**

यः कर्ता स भोक्ता व्यवहारगुणेन भवति कर्मणः ।
न तु निश्चयेन भणितः कर्ता भोक्ता च कर्मणां ॥

**कम्ममलछाइओ वि य ण मुयंइ[1] सो चेयणगुणं किं पि ।**
**जोणीलक्खगओ वि य जह कणयं कद्दमे खित्तं ॥ २९७ ॥**

कर्ममलच्छादितोऽपि च न जानाति चेतनगुणं किमपि ।
योनिलक्षगतोऽपि च यथा कनकं कर्दमे क्षिप्तं ॥

---

१ ण. ख. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुहमो अमुत्तिवंतो वण्णं[1]गंधाइफासपरिहीणो ।**
**पुग्गलमज्झिगओ वि य ण य मि[2]ल्लइ णिययसब्भावं ॥२९८॥**

सूक्ष्मोऽमूर्तिमान् वर्णगन्धादिस्पर्शपरिहीनः ।
पुद्गलमध्यगतोऽपि च न च मुञ्चति निजकस्वभावं ॥

**सब्भा[3]वणुड्ढगई विदिसं परिहरिय गइचउक्केण ।**
**गच्छेइ कम्मजुत्तो सुद्धो[4] पुण रिजुगई जाई ॥ २९९ ॥**

स्वभावेनोर्ध्वगतिः विदिशां परिहृत्य गतिचतुष्केन ।
गच्छति कर्मयुक्तः शुद्धः पुनः ऋजुगतिं याति ॥

**पाणिविमुत्ता लंगलि वंकगई होइ तह य पुण तइया ।**
**कम्मइयकायजुत्तो दो तिण्णि य कुणइ वंकाइं ॥ ३०० ॥**

पाणिविमुक्ता लांगलिका वक्रगतिः भवति तथा च पुनः तृतीया ।
कार्मणकाययुक्तः द्वित्रीणि करोति वक्राणि ॥

**तइए समए गिण्हइ चिरकयकम्मोदएण सो देहं ।**
**सुरणरणारइयाणं तिरियाणं चेव लेसवसो ॥ ३०१ ॥**

तृतीये समये गृह्णाति चिरकृतकर्मोदयेन स देहं ।
सुरनरनारकाणां तिरश्चां चैव लेश्यावशः ॥

**सुहदुक्खं भुंजंतो हिंडइ जोणीसु सयसहस्सेसु ।**
**एइंदियवियलिंदियसयलिंदियपज्जपज्जत्तो ॥ ३०२ ॥**

---

१ रूवविवण्णाइं ख. । २ मे. ख. । ३ ससहावेणुड्ढगई ख. । स्वस्वभावेनोर्ध्वगतिः । ४ सिद्धो ख. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखदुःखं भुञ्जानः हिण्डते योनिषु शतसहस्रेषु ।
एकेन्द्रियविकलेन्द्रियसकलेन्द्रियपर्याप्तापर्याप्तः ।
जीवः ।

---

**होंति अजीवा दुविहा रूवारूवा य रूवि चउभेया ।**
**खंधं च तहा देसो खंधपदेसो य परमाणू ॥ ३०३ ॥**

भवन्ति अजीवा द्विविधा रूप्यरूपाश्च रूपिणश्चतुर्भेदाः ।
स्कन्धश्च तथा देशः स्कन्धप्रदेशश्च परमाणुः ॥

**णिहिलावयं च खंधा तस्स य अद्धं च वुच्चदे देसो ।**
**अद्धद्धं च पदेसो अविभागी होइ परमाणू ॥ ३०४ ॥**

निखिलावयवश्च स्कन्धः तस्य चार्धं च उच्यते देशः ।
अर्धार्धं च प्रदेशोऽविभागी भवति परमाणुः ॥

**धम्माधम्मागासा अरूविणो होंति तह य पुण कालो ।**
**गइठाणकारणावि य उग्गाहण वत्तणा कमसो ॥ ३०५ ॥**

धर्माधर्माकाशाः अरूपा भवन्ति तथा च पुन कालः ।
गतिस्थानकारणमपि चावगाहनस्य वर्तनायाः क्रमशः ॥

**जीवाण पुग्गलाणं गइप्पवत्ताण कारणं धम्मो ।**
**जह मच्छाणं[1] तोयं थिरभूया णेव सो णेई ॥ ३०६ ॥**

जीवानां पुद्गलानां गतिप्रवृत्तानां कारणं धर्मः ।
यथा मत्स्यानां तोयं स्थिरीभूतान् नैव स नयति ॥

**ठिदिकारणं अधम्मो विसामठाणं च होइ जह छाया ।**
**पहियाणं रुक्खस्स य गच्छंतं[2] णेव सो धरई ॥ ३०७ ॥**

---

१ मच्छयाण ख. । २ गच्छमाणा ण सो ख. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थितिकारणं अधर्मः विश्रामस्थानं च भवति यथा छाया ।
पथिकानां वृक्षस्य च गच्छतः नैव स धरति ॥

**सव्वेसिं दव्वाणं अवयासं देइ तं तु आयासं ।**
**तं पुणु दुविहं भणियं लोयालोयं च जिणसमए ॥ ३०८ ॥**

सर्वेषां द्रव्याणामवकाशं ददाति तत्त्वाकाशं ।
तत्पुनः द्विविधं भणितं लोकालोकं च जिनसमये ॥

**वत्तणगुणजुत्ताणं दव्वाणं होइ कारणं कालो ।**
**सो दुविहभेयभिण्णो परमट्ठो होइ ववहारो ॥ ३०९ ॥**

वर्तनागुणयुक्तानां द्रव्याणां भवति कारणं कालः ।
स द्विविधभेदभिन्नः परमार्थो भवति व्यवहारः ॥

**परमट्ठो कालाणू लोयपदेसे हि संठिया णिच्चं ।**
**एक्केक्के एक्केक्का अपएसा रयणरासिव्व ॥ ३१० ॥**

परमार्थः कालाणवः लोकप्रदेशे हि संस्थिता नित्यं ।
एकैकस्मिन् एकैका अप्रदेशा रत्नानां राशिरिव ॥

**वट्टणकालो समओ पुग्गलपरमाणुवाण संजाओ ।**
**ववहारस्स य मुक्खो उप्पण्णो तीद भावी स ॥ ३११ ॥**

वर्तनाकालः समयः पुद्गलपरमाणूनां संजातः ।
व्यवहारस्य च मुख्यः उत्पद्यमानोऽतीतो भावी सः ॥

**तेसिं पि य समयाणं संखारहियाण आवली होई ।**
**संखेज्जावलिगुणिओ उस्सासो होई जिणदिट्ठो ॥ ३१२ ॥**

तेषामपि च समयानां संख्यारहितानां आवली भवति ।
संख्यातावलीगुणित उच्छ्वासो भवति जिनदृष्टः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सत्तुस्सासे थोओ सत्तथोएहिं होइ लओ इक्को ।**
**अट्टत्तीसद्धलवा णाली वेणालिया मुहुत्तं तु ॥ ३१३ ॥**

सप्तोच्छ्वासेन स्तोकः सप्तस्तोकैः भवति लव एकः ।
अष्टत्रिंशदर्धलवा नाली द्विनालिका मुहूर्तस्तु ॥

**तीसमुहुत्तो दिवसो पणदहदिवसेहि होइ पक्खं तु ।**
**विहि पक्खेहि य मासो रिउ एक्का वेहिं मासेहिं ॥३१४॥**

त्रिंशन्मुहूर्तं दिवसं पंचदशदिवसैः भवति पक्षस्तु ।
द्वाभ्यां पक्षाभ्यां च मासः ऋतुरेको द्वाभ्यां मासाभ्यां ॥

**रिउतियभूयं अयणं अयणजुयलेण होइ वरिसेक्को ।**
**इय ववहारो उत्तो कमेण विड्ढिंगओ विविहो ॥ ३१५ ॥**

ऋतुत्रिभूतमयनं अयनयुगलेन भवति वर्षं एकः ।
एष व्यवहार उक्तः क्रमेण वृद्धिंगतो विविधः ॥

**एयं तु दव्वछक्कं जिणेहि पंचत्थिकाइयं भणियं ।**
**वज्जिय कायं कालो कालस्स पएसयं णत्थि ॥ ३१६ ॥**

एतत्तु द्रव्यषट्कं जिनैः पंचास्तिकायिकं भणितं ।
वर्जयित्वा कायं कालं कालस्य प्रदेशो नास्ति ॥

**जं पुण रूवी दव्वं गंधरसफासवण्णसंजुत्तं ।**
**लहिऊण जीवचिट्टा कारणयं कम्मबंधस्स ॥ ३१७ ॥**

यत्पुना रूपि द्रव्यं गन्धरसस्पर्शवर्णसंयुक्तं ।
लब्ध्वा जीवस्थितं कारणं कर्मबन्धस्य ॥

अजीवः ।

---

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सम्मत्तसुद्वएहिं य कसायउवसमणगुणसमाउत्तो ।**
**जो जीवो सो पुण्णं पावं वीवरीयदोसाओ ॥ ३१८ ॥**

सम्यक्त्वश्रुतव्रतैः च कषायोपशमनगुणसमायुक्तः ।
